## इञः प्राचाम् । (६०/१०८५)

[1]गोत्रे य इञ्, तदन्ताद् युवप्रत्ययस्य लुग् भवति । गोत्रविशेषणं [2]प्राग्ग्रहणम्, न विकल्पार्थम् । पान्नागारेरपत्यं युवा । 'यञिञोश्च' (४. १. १०१/११०३) इति फक्, तस्य लुक् । पान्नागारिः पिता । पान्नागारिः पुत्रः । [3]मान्थरैषणिः पिता । [4]मान्थरैषणिः पुत्रः । प्राचाम् इति [5]किम् ? दाक्षिः पिता । दाक्षायणः पुत्रः ॥

## न तौल्वलिभ्यः ।(६१/१०८६)

[6]अनन्तरेण प्राप्तो लुक् प्रतिषिध्यते । तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य न लुग् भवति । तौल्वलिः पिता । तौल्वलायनः पुत्रः ।

[7]तौल्वलि । धारणि । [8]रावणि । पारणि । [9]दैलीपि । [10]दैवलि । [11]दैवमति । दैवयज्ञि । [12]प्रावाहणि । [13]मान्धातकि । [14]आनुहारति । श्वाफल्कि । आनुमति । आहिंसि । [15]आसुरि । आयुधि । [16]नैमिषि । [17]आसिबन्धकि । बैकि । आन्तरहाति । पौष्करसादि । [18]वैरकि । [19]वैलकि । वैहति । वैकर्णि । कारेणुपालि । कामालि ॥

## तद्राजस्य बहुषु तेनैवास्त्रियाम् । (६२/११९३)

'ते तद्राजाः' (४. १. १७४/११९२), 'ञ्यादयस्तद्राजाः' (५.३.११९/२०७२) इति[20] वक्ष्यति, [21]तस्य [22]तद्राजसञ्ज्ञस्य प्रत्ययस्य बहुषु वर्तमानस्य अस्त्रीलिङ्गस्य लुग् भवति, तेनैव चेत् तद्राजेन कृतं बहुत्वं भवति । अङ्गाः । वङ्गाः । [23]पुण्ड्राः । सुह्माः । [24]मगधाः (४.१. १७०/११८८) । लोहध्वजाः । [25]व्रीहिमन्तः (५.३.११२/२०६६) । तद्राजस्य इति[26] किम् ? औपगवाः । बहुषु इति [27]किम् ? आङ्गः । तेनैव ग्रहणं [28]किम् ? प्रियो वाङ्गो येषां त इमे प्रियवाङ्गाः (म. भा. १. ४९०) । अस्त्रियाम् इति [29]किम् ? आङ्ग्यः स्त्रियः (म. भा. १. ४९०) ॥

## यस्कादिभ्यो गोत्रे । (६३/११४६)

बहुषु तेनैवास्त्रियाम् इति सर्वमनुवर्तते । यस्क इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु वर्तमानस्य अस्त्रीलिङ्गस्य लुग् भवति, तेनैव चेद् [30]गोत्रप्रत्ययेन [31]कृतं बहुत्वं भवति । प्रत्ययविधेश्चान्यत्र[32] लौकिकस्य [33]गोत्रस्य ग्रहणम् इत्यनन्तरापत्येऽपि लुग् भवत्येव । यस्काः । [34]लभ्याः । बहुषु इत्येव, यास्कः । तेनैव इत्येव, प्रिययास्काः । अस्त्रियाम् इत्येव, यास्क्यः स्त्रियः । गोत्रे इति किम् ? यास्काश्छात्राः ।

---

1. प्राचां इत्यधिकम् इ. क. 2. प्राचां ग्रहणं ह. क. 3-4. मान्धरेषणिः ब. क. ड. ह. 5. किमर्थम् इ. 6. आनन्तरो लुक् क. 7. तैल्वलि ब. क. 8. नास्ति क. 9. दैवीमि ह. 10. नास्ति क. ह. 11. दैवमिति क, दैवति इ, दैवमित्रि. 12. प्राणगाति ह, प्राणहति क. ड. फ. 13. आबन्धकि ह. 14. आनुराहति क.ड.इ, आसुराहति फ. 15. आमुरि, आयुधि नास्ति ह,रान्वकि आसुराहति प्राणाहति पैङ्कि कान्दकि दौषकगति आन्तराहति इत्यधिकम् क.ड. 16. नैमित्ति ह. 17. आसि ड, आसिपिण्डि ग. 18. वैकरि इ. 19. नास्ति ड. 20. च इत्यधिकम् क. ड. 21. तस्येदं ग्रहणम् फ. 22. तद्राजसञ्ज्ञकस्य क, तद्राजस्य इ. 23. नास्ति ह. 24. नास्ति ड. फ. 25. व्रीहिमाताः इ. 26–27. किमर्थम् इ. 28. इति इत्यधिकम् इ. 29. किमर्थम् इ. 30. गोत्रप्रत्ययान्तेन ह. 31. कृतं नास्ति ड. 32. अन्यलौकिकस्य फ. 33. गोत्रग्रहणम् क, गोत्रप्रत्ययस्य ड. 34. लह्याः ब. क, द्रुह्याः ड. फ.